# संस्कृतवार्ताः

**दिनाङ्क :-12.03.2025**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-मॉरीशस यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य मॉरीशसदेशस्य राष्ट्रियदिवससमारोहे मुख्यातिथिः भविष्यति। ह्यः श्रीमोदी पोर्टलुईस इत्याख्ये स्थले स्वकीयेन सहकक्षेण नवीनचन्द्र-रामगुलाम-इत्येतेन सह उपयोगिनीं साकारात्मिकीं चर्चां समाचरितवान् अपि च उभयोः देशयोः मध्ये सहभागितायाः पुष्टिं कृतवान्। उभौ नेतारौ द्विपक्षीय-सम्बन्धानां वर्तमान-सहयोगस्य चापि समीक्षां विहितवन्तौ। उपवेशनावधौ रक्षा-सुरक्षार्थिक-सांस्कृतिक-सम्बन्धेषु विचाराणाम् आदान-प्रदानमपि जातम्। प्रधानमन्त्रिणा निगदितं यत् भारतस्य समीपे एकः विश्वासयुतः मॉरीशसदेशः अस्ति इति। तथा च भारत-मॉरीशसदेशौ ग्लोबलसाउथ इत्येतस्य वैश्विकदक्षिणस्य कल्याणपन्थानः संवर्धयितुं कार्यं करिष्यतः। तदनु मॉरीशस-देशस्य प्रधानमन्त्रीद्वारा आयोजिते भोजनावधौ स्वकीये सम्बोधने श्रीमोदी अवोचत् यत् भारत-मॉरीशसदेशयोर्मध्ये सम्बन्धः न केवलं परम्परागतो वर्तते अपितु भविष्यकाले उभौ देशौ आधारभूतावसंरचनायुतासु परियोजनास्वपि कार्यं विधास्यतः । प्रधानमन्त्रिणा अग्रे प्रतिपादितं यत् आगामिषु दिवसेषु भारत-मॉरीशस-देशौ स्वजनानां विकासाय समग्रक्षेत्रस्य शान्तये सुरक्षायै च मिलित्वा सहकार्यं सम्पादयिष्यतः। इतः पूर्वं प्रधानमन्त्री नरेन्द्रमोदी ह्यः रात्रौ पोर्टलुइस इत्यत्र भारतीयप्रवासिनः सम्बोधयन् उक्तवान् यत् मॉरीशसदेशः भारत-वैश्विक-दक्षिणयोः मध्ये एकः सेतुः वर्तते। अपि च भारतस्य सागरलक्ष्यस्य केन्द्रत्वेनापि गण्यते। प्रधानमन्त्री पुनः प्रत्यपादयत् यत् मॉरीशसदेशः न केवलं सहभागी देशो वर्तते अपि तु भारतस्य कुटुम्बस्य भागोऽपि विद्यते। अयं सम्बन्धः इतिवृत्ते परम्परायां मानवात्मनि च गहनः दृढश्चास्ति इति उक्तवान् प्रधानमन्त्री।

**राष्ट्रपतिः**

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः पञ्जाबप्रशासनेन मोहालीनगरे आयोजिते नागरिकाभिनन्दन-समारोहे ह्यः सहभागं कृतवती। अद्य राष्ट्रपतिः चण्डीगढे पञ्जाब-विश्वविद्यालयस्य द्विसप्ततितमं दीक्षान्तसमारोहं सम्बोधयिष्यति।

**लोकसभानुदानाम्**

लोकसभया ह्यः पञ्चविंशत्यधिक-चतुर्विंशत्यधिक-द्विसहस्रतमवर्षयोः कृते द्वितीय-संभागस्य अनुपूरकानुदानाभ्यर्थनेभ्यः द्वाविंशत्यधिकैक विंशत्यधिक-द्विसहस्र-तमवर्षयोः कृते अतिरिक्ततानुदानाभ्यर्थनाय अस्य वित्तीयवर्षस्य मणिपुरस्य अर्थ-सङ्कल्पपत्राय तथा च गतवर्षस्य मणिपुरस्य अनुपूरकानुभ्यर्थनेभ्यः स्वीकृतिः प्रदत्ता। सभायां चर्चायाः प्रत्युत्तरे वित्तमन्त्री निर्मलासीतारामन् इत्येषा अवदत् यत् मणिपुरराज्यस्य अर्थव्यवस्थां द्रुतगत्या पुनः प्राप्तुं समर्थयितुं च केन्द्रं सर्वं वित्तीयसाहाय्यं प्रददाति। राज्ये कदापि एतादृशः निधिः नासीत् इति कथयित्वा सा मणिपुरस्य कृते पञ्चशत-कोटि-रूप्यकाणां कोषस्य घोषणामपि कृतवती।

**संयुक्तराष्ट्रम्**

अमरिकादेशेन निगदितं यत् यूक्रेनदेशेन तात्कालिकप्रभावरीत्या अमेरिकादेशेन सह सैन्यवार्तायाः तस्य प्रस्तावे सहमतिः प्रकटिता। अमरिकादेशेन त्रिंशद्दिवसानां कृते अल्पसमयस्य युद्धविरामस्य घोषणा कृतास्ति। सम्प्रति च रूसदेशे निर्भरो वर्तते यत् असौ देशः अस्मिन् विषये प्रतिक्रियां दास्यति उत वा न प्रदास्यति।

**क्रिकेट्**

वीमेन्स-प्रीमियर-लीग-इत्येतस्यां क्रिकेट्-मालिकायां गतरात्रौ बारबॉर्न-क्रिकेट्-क्रीडाङ्गणे रॉयलचैलेन्जर्स-बेंगलुरु-दलेन मुम्बई-इण्डियन्स-इत्येद्दलं एकादश धावनाङ्कै पराजितम्। रॉयलचैलेन्जर्स-बेंगलुरूइत्येतेन दलेन मुम्बईइण्डियन्सइत्यस्मै दलाय द्विशतधावनङ्कानां लक्ष्यं स्थापितम्। तदनु मुम्बई-इण्डियन्स-दलेन विंशति-कन्दुकक्षेपणेषु नवक्रीडकानां हानिपुरस्सरम् अष्टाशीत्यधिकैकशतं धावनाङ्काः समर्जिताः।

**॥ इति वार्ता:॥**